শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীৱরৱরমুনিভিরনুগৃহীতং

# ॥ মুক্তকমঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ মুক্তকমঙ্গলম্ ॥

শ্রীশৈলেশদযাপাত্রং ধীভক্ত্যাদিগুণার্ণৱম্।
যতীন্দ্রপ্রৱণং ৱন্দে রম্যজামাতরং মুনিম্॥

লক্ষ্মীচরণলাক্ষাঙ্কসাক্ষি শ্রীৱৎসৱক্ষসে।
ক্ষেমঙ্করায সর্ৱেষাং শ্রীরঙ্গেশায মঙ্গলম্॥ **1** ॥

শ্রিযঃকান্তায কল্যাণনিধযে নিধযেঽর্থিনাম্।
শ্রীৱেঙ্কটনিৱাসায শ্রীনিৱাসায মঙ্গলম্॥ **2** ॥

অস্তু শ্রীস্তনকস্তূরীৱাসনাৱাসিতোরসে।
শ্রীহস্তিগিরিনাথায দেৱরাজায মঙ্গলম্॥ **3** ॥

কমলাকুচকস্তূরীকর্দমাঙ্কিতৱক্ষসে।
যাদৱাদ্রিনিৱাসায সম্পৎপুত্রায মঙ্গলম্॥ **4** ॥

শ্রীনগর্যাং মহাপুর্যাং তাম্রপর্ণ্যুত্তরে তটে।
শ্রীতিন্ত্রিণীমূলধাম্নে শঠকোপায মঙ্গলম্॥ **5** ॥

শ্রীমত্যৈ ৱিষ্ণুচিত্তার্যমনোনন্দনহেতৱে।
নন্দনন্দনসুন্দর্যৈ গোদাযৈ নিত্যমঙ্গলম্॥ **6** ॥

শ্রীমন্মহাভূতপুরে শ্রীমৎকেশৱযজ্ৱনঃ।
কান্তিমত্যাং প্রসূতায যতিরাজায মঙ্গলম্॥ **7** ॥

মঙ্গলাশাসনপরৈঃ মদাচর্যপুরোগমৈঃ।
সর্ৱৈশ্চ পূর্ৱৈরাচার্যৈঃ সৎকৃতাযাস্তু মঙ্গলম্॥ **8** ॥

॥ ইতি মুক্তকমঙ্গলম্ সমাপ্তম্॥